शास्त्री साहित्य

तृतीय खण्ड रघुवंशमहाकाव्यम् - चतुर्दशसर्गः

प्र० (1) — पद्यमिदम् व्याख्येयम् ।

उत्तरम् — उभावुभाभ्यां प्रणतौ हतारी यथाक्रमं विक्रमशोभिनौ तौ ।
विस्पष्टमस्रान्धतया न दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलम्भात् ॥

उत्तरम् — प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचित रघुवंशमहाकाव्यस्य चतुर्दशसर्गात् समुद्धृतोऽस्ति ।

व्याख्या — पराक्रमी रामः लक्ष्मणश्च क्रमशः कौशल्यां सुमित्रां च प्राणमताम् । स्व पुत्रौ अवलोकयन्त्यौ उभे एव मातरौ अश्रुपूरित-नयने अभवताम् अतएव ते पूर्णतः अर्थात् सम्यक् प्रकारेण तौ द्रष्टुं तु न अशक्नुताम् परन्तु पुत्रौ वात्सल्येन सुतस्पर्श-जन्यसुखेन अवागच्छताम् ।

यथाक्रमं = क्रमानुसारम्, स्वस्वमातृपूर्वकम् । प्रणतौ = कृत प्रणामौ । हतारी = कृतशत्रुनाशौ । विक्रमशोभिनौ = पराक्रमशोभिनौ । तौ = पूर्वोक्तौ उभौ = द्वौ, राम लक्ष्मणौ । उभाभ्यां = द्वाभ्याम्, कौशल्यासुमित्राभ्यां मातृभ्याम् । अस्रान्धतया = अश्रुभिर्द्रष्टुमशक्यतया । विस्पष्टं = सुव्यक्तम् । न दृष्टौ = नावलोकितौ । किन्तु सुतस्पर्शसुखोपलम्भात् पुत्रदर्शनानन्दानुभवात् । ज्ञातौ = विदितौ ।

Renu Devi
12/06/21

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री साहित्य
प्रथम-खण्ड
शिशुपालवधम् महाकाव्यम्

Date ___/___/___

(क) प्र० — पद्यमिदम् व्याख्येयम् ।

गतं तिरश्चीनमनूरुसारथेः,
प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः ।
पतत्यधो धाम विसारि सर्वतः,
किमेतदित्याकुलमीक्षितं जनैः ॥

उत्तरम् — प्रस्तुतोऽयं श्लोकः महाकवि माघविरचित शिशुपालवध महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

प्रसंगः — प्रस्तुत श्लोके आकाशमार्गात् पृथ्वीं प्रति आगच्छन्तं परम तेजोमयं देवर्षिं नारदं भूतलवासिनः महता आश्चर्येण सह पश्यन्तः सन्ति, तस्यैवात्र वर्णनम् ।

व्याख्या — आकाशमार्गात् भूतलं प्रति अवतरत् विलक्षणं तेजः अवलोक्य नगरवासिभिः विचारितम् यत्सूर्यस्तु आकाशे सदा वक्रगत्या चलति तथा अग्निः सदा ऊर्ध्वम् उत्तिष्ठति अतः सूर्यस्य एवम् अग्नेश्च तेजसोऽपि विलक्षणामिदं कतमत्तेजः अस्ति ।

विशेष — (1) पौराणिक कथानुसारं सूर्यस्य सारथेः 'अरुणस्य' जंघा नैवासीत् अतः सः "अनूरुः" कथ्यते । अरुणः विनतायाः पुत्र आसीत् ।

(2) - अत्र नारदस्य तेजः सूर्यस्य तथा अग्नेः तेजसोऽपि अधिकं विशिष्टमुक्तमस्ति अतः व्यतिरेक अलंकारः ।

Renu Devi
12/06/21
राधा उमाकान्त सं० महा०वि० सुखसेना, पूर्णिया ।

Page No.

उपशास्त्री साहित्य - तृतीय - पत्रम्
प्रथम - खण्ड काव्यदीपिका

Saathi

Date ___/___/___

(1) प्र० — रस दोषान् लिखत ?

उत्तरम् → ये साक्षाद्रसमपकर्षयन्ति ते रसदोषाः। साक्षाद् रसमपकर्षकत्वं रसदोषत्वमिति भावः। रसशब्दोऽत्र रसाभासादीनामपि उपलक्षणम्। ते च रसदोषाः चतुर्दश भवन्ति। उक्तञ्च —

रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि।
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ॥
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः।
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः ॥
इत्यादिकाः सहृदयैः रसे दोषाः प्रकीर्तिताः ॥

प्र० (2) — सलक्षणान् गुणभेदान् स्पष्टयत ?

उत्तरम् — रसस्योत्कर्षत्वे सति रसव्यभिचारिस्थितत्वं गुणत्वम् अव्यभिचारेण रसोपकारकत्वं वा गुणत्वम् इति। स च त्रिविधः माधुर्यम्, ओजः प्रसादश्चेति। उक्तं च मम्मटेन —

माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश।

Renu devi
12/06/21
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

Page No. ___

उपशास्त्री साहित्य - तृतीय - पत्रम्
द्वितीय-खण्ड
काव्यदीपिका

Saathi

Date ___/___/___

① प्र० — उपमायाः किं स्वरूपम् ?

उत्तरम् — प्रस्फुटं सुन्दरं साम्यमुपमेत्यभिधीयते ।
प्रस्फुटमिति रूपकादिगम्यसाम्यात् भेदाय । सुन्दरं - वैचित्र्यजनकम् । तेन "गौरिव गवयः" इत्यप्र नायमलंकारः । साम्यं — सादृश्यम् साम्यञ्च क्रियागतं, गुणगतम्, उभयगतञ्चेति त्रिविधम् ।

② प्र० → अतिशयोक्तिरलङ्कारस्य किं स्वरूपम् ?

उत्तरम् — सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते ।
प्रकृतस्य निगरणेनाभेदज्ञानमप्रकृतस्य अध्यवसायः । तस्य च उत्प्रेक्षायामप्रस्तुतस्यानिश्चितत्वेन निर्देशात् साध्यत्वम् । इह तु निश्चितत्वेनैव प्रतीतिरिति सिद्धत्वमित्यनयोर्भेदः । निगरणश्च उभयत्रापि समानमेव ।

③ प्र० — तुल्ययोगिताऽलङ्कारस्य किं स्वरूपम् ?

उत्तरम् → पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥
केवलं प्रस्तुतानामप्रस्तुतानां वा एकधर्मसम्बन्धः तुल्ययोगि
कुमारसम्भवे यथा —

यंसर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते —
दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधींश्च पृथुपदिष्टां
दुदुहुर्धरित्रीम् ॥

Renu Devi
12/06/21
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णियां ।

Page No.